শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ দ্বিপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ দ্বিপঞ্চাশঃ সর্গঃ ॥

## ৱসিষ্ঠেন রাজ্ঞো ৱিশ্ৱামিত্রস্য সৎকারায মনোৱাঞ্ছিতৱস্তূনি স্রষ্টুং কামধেনুং প্রত্যাদেশদানম্

তং দৃষ্টৱা পরমপ্রীতো ৱিশ্ৱামিত্রো মহাবলঃ।
প্রণতো ৱিনযাদ্ ৱীরো ৱসিষ্ঠং জপতাং ৱরম্॥ **1.52.1** ॥

স্ৱাগতং তৱ চেত্যুক্তো ৱসিষ্ঠেন মহাত্মনা।
আসনং চাস্য ভগৱান্ ৱসিষ্ঠো ৱ্যাদিদেশ হ॥ **1.52.2** ॥

উপৱিষ্টায চ তদা ৱিশ্ৱামিত্রায ধীমতে।
যথান্যাযং মুনিৱরঃ ফলমূলমুপাহরৎ॥ **1.52.3** ॥

প্রতিগৃহ্য তু তাং পূজাং ৱসিষ্ঠাদ্ রাজসত্তমঃ।
তপোঽগ্নিহোত্রশিষ্যেষু কুশলং পর্যপৃচ্ছত॥ **1.52.4** ॥

ৱিশ্ৱামিত্রো মহাতেজা ৱনস্পতিগণে তদা।
সর্ৱত্র কুশলং প্রাহ ৱসিষ্ঠো রাজসত্তমম্॥ **1.52.5** ॥

সুখোপৱিষ্টং রাজানং ৱিশ্ৱামিত্রং মহাতপাঃ।
পপ্রচ্ছ জপতাং শ্রেষ্ঠো ৱসিষ্ঠো ব্রহ্মণঃ সুতঃ॥ **1.52.6** ॥

কচ্চিত্তে কুশলং রাজন্ কচ্চিদ্ ধর্মেণ রঞ্জযন্।
প্রজাঃ পালযসে রাজন্ রাজৱৃত্তেন ধার্মিক॥ **1.52.7** ॥

কচ্চিত্তে সম্ভৃতা ভৃত্যাঃ কচ্চিৎ তিষ্ঠন্তি শাসনে।
কচ্চিত্তে ৱিজিতাঃ সর্ৱে রিপৱো রিপুসূদন॥ **1.52.8**॥

কচ্চিদ্ বলেষু কোশেষু মিত্রেষু চ পরন্তপ।
কুশলং তে নরৱ্যাঘ্র পুত্রপৌত্রে তথানঘ॥ **1.52.9**॥

সর্ৱত্র কুশলং রাজা ৱসিষ্ঠং প্রত্যুদাহরৎ।
ৱিশ্ৱামিত্রো মহাতেজা ৱসিষ্ঠং ৱিনযান্ৱিতম্॥ **1.52.10**॥

কৃৎৱা তৌ সুচিরং কালং ধর্মিষ্ঠৌ তাঃ কথাস্তদা।
মুদা পরমযা যুক্তৌ প্রীযেতাং তৌ পরস্পরম্॥ **1.52.11**॥

ততো ৱসিষ্ঠো ভগৱান্ কথান্তে রঘুনন্দন।
ৱিশ্ৱামিত্রমিদং ৱাক্যমুৱাচ প্রহসন্নিৱ॥ **1.52.12**॥

আতিথ্যং কর্তুমিচ্ছামি বলস্যাস্য মহাবল।
তৱ চৈৱাপ্রমেযস্য যথার্হং সম্প্রতীচ্ছ মে॥ **1.52.13**॥

সৎক্রিযাং হি ভৱানেতাং প্রতীচ্ছতু মযা কৃতাম্।
রাজংস্ত্ৱমতিথিশ্রেষ্ঠঃ পূজনীযঃ প্রযত্নতঃ॥ **1.52.14**॥

এৱমুক্তো ৱসিষ্ঠেন ৱিশ্ৱামিত্রো মহামতিঃ।
কৃতমিত্যব্রৱীদ্ রাজা পূজাৱাক্যেন মে ৎৱযা॥ **1.52.15**॥

ফলমূলেন ভগৱন্ ৱিদ্যতে যৎ তৱাশ্রমে।
পাদ্যেনাচমনীযেন ভগৱদ্দর্শনেন চ॥ **1.52.16**॥

সর্ৱথা চ মহাপ্রাজ্ঞ পূজার্হেণ সুপূজিতঃ।
নমস্তেঽস্তু গমিষ্যামি মৈত্রেণেক্ষস্ৱ চক্ষুষা॥ **1.52.17**॥

এৱং ব্রুৱন্তং রাজানং ৱসিষ্ঠং পুনরেৱ হি।
ন্যমন্ত্রযত ধর্মাত্মা পুনঃ পুনরুদারধীঃ॥ **1.52.18**॥

বাঢমিত্যেৱ গাধেযো ৱসিষ্ঠং প্রত্যুৱাচ হ।
যথাপ্রিযং ভগৱতস্তথাস্তু মুনিপুঙ্গৱ॥ **1.52.19** ॥

এৱমুক্তস্তথা তেন ৱসিষ্ঠো জপতাং ৱরঃ।
আজুহাৱ ততঃ প্রীতঃ কল্মাষীং ধূতকল্মষাম্॥ **1.52.20** ॥

এহ্যেহি শবলে ক্ষিপ্রং শৃণু চাপি ৱচো মম।
সবলস্যাস্য রাজর্ষেঃ কর্তুং ৱ্যৱসিতোঽস্ম্যহম্।
ভোজনেন মহার্হেণ সৎকারং সংৱিধৎস্ব মে॥ **1.52.21** ॥

যস্য যস্য যথাকামং ষড্রসেষ্ৱভিপূজিতম্।
তৎ সর্ৱং কামধুগ্ দিৱ্যে অভিৱর্ষ কৃতে মম॥ **1.52.22** ॥

রসেনান্নেন পানেন লেহ্যচোষ্যেণ সংযুতম্।
অন্নানাং নিচযং সর্ৱং সৃজস্ব শবলে ৎৱর॥ **1.52.23** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে দ্বিপঞ্চাশঃ সর্গঃ ॥